**बाणगङ्गा** स्त्री रावणबाणनिर्भेदेन प्रवृत्तायां नद्याम् “सोमेशाद्दक्षिणे भागे बाणेनाभिविभिद्य वै। रावणेन प्रकटिता जलधारातिपुण्यदा। बाणगङ्गेतिविख्याता या स्नानादघहारिणी” वराहपु०। [२तूणे हेमच०।

**बाणधि** पु० बाणा धीयन्तेऽस्मिन् धा—आधारे कि। १इषुधौ

**बाणपुङ्खा** स्त्री बाणस्य पुङ्ख इवाऽस्याः ५ब०। शरपुङ्खायां राजनि०

**बाणपुर** न० ६त०। बाणासुरनगरे शोणितपुरे त्रिका०।

**बाणमुद्रा** स्त्री “यथा हस्तगता बाणास्तथा हस्ताङ्गुरं प्रिये!। बाणमुद्रा समाख्याता रिपुवर्गनिकृन्तनी” तन्त्रसा० उक्ते मुद्राभेदे।

**बाणयुद्ध** न० ६त०। कृष्णेन सह शिवसाहाय्यकस्य बाणस्य युद्धे तच्च युद्धं भाग० १०।६१ अध्यायादौ दृश्यम्।

**बा(व)णलिङ्ग** बाणदैत्येन संपूज्य अविसृज्य नर्मदायां निक्षिप्ते शिवलिङ्गभेदे। नर्मदाशब्दे ३९८७ पृ० विवृतिः।

**बाणवार** न० बाणं वारयति वारि—अण् उप०स०। १कञ्चुके सन्नाहे हारा०।

**बाणिज्य** न० वणिजो भावः, कर्म वा ब्राह्मणादित्वात् ष्यञ्। क्रयविक्रयादौ “वाणिज्येन गतस्य मे गृहपतेर्वार्त्तापि न श्रूयते” सा० द० परि०।

तत्र विहितनिषिद्धानि मिता० उक्तानि यथा

“मानेन तुलया वापि योऽंशमष्टमकं हरेत्। दण्डं सदाप्यो द्विशतं वृद्धौ हानौ च कल्पितम्”। यः पुनर्वणिक् व्रीहिकार्पासादेः पण्यस्याष्टमभागं कूटमानेन कूटतुलया वाऽन्यथापहरत्यसौ पणानां द्विशतं दण्डनीयः। अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्प्ये। “भेषजस्नेहलवणगन्धधान्यगुडादिषु। पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोडश” याज्ञ०। भेषजमौषधद्रव्यं स्नेहो घृतादिः। गन्धद्रव्यमुशीरादि आदिशब्दाद्धिङ्गुमरिचादि। एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयतः षोडशपणो दण्डः। किञ्च। “मृच्चर्ममणिसूत्रायःकाष्ठवल्कलवाससाम्। अजातौ जातिकरणे विक्रेयाष्टगुणोदमः” या० स्मृ०। “न विद्यते बहुमूल्या जातिर्यस्मिन् मृच्चर्मादिके तदजाति तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन बहुमूल्यजातीयसादृश्यसम्पादने यथा मल्लिकामोदसञ्चारणेन मृत्तिकायां सुगन्धापादनमिति। मार्जारचर्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कार्ष्णायसे वर्णोत्कर्षाधानेन रजतमिति बिल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति कक्कोले त्वगाख्यं लवङ्गमिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितस्य द्रव्यस्य मृच्चर्मादेः पण्यस्याष्टगुणो दण्डो वेदितव्यः। “समुद्गपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम्। आधानं विक्रयं वापि नयतो दण्डकल्पना। भिन्ने पणे तु पञ्चाशत्पणे तु शतमुच्यते। द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान्” याज्ञ०। मुद्गं पिधानं मुद्गेन सह वर्त्तत इति समुद्गं करण्डकम्। परिवर्त्तनं व्यत्यासः। योऽन्यदेवमुक्तानां पूर्णं करण्डकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फाटिकानां पूर्णकरण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या। कृत्रिमकस्तूरिकादेर्मूल्यभूते पणे भिन्ने न्यूने न्यूनपण्यमूल्यमिति”।

“लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा। षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः। गणिकन्तुलितं मेयं क्रियया रूपतः श्रियेति” गणितं क्रमुकफलादि तुलितं कुङ्कुमादि मेयं शाल्यादि क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि। रूपतः पण्याङ्गनादि श्रिया दीप्त्या मरकतपद्मरागादि। इत्येतत् षट् प्रकारमपि पण्यम्” मिता०। तस्य विप्रैरापदि स्वयं कार्य्यत्वं विदधे वृहस्पतिः “कुसीदकृषिवाणिज्यं प्रकुर्वीतास्वयं कृतम्। आपत्काले स्वयं कुर्वन् नैनसा लिप्यते द्विजः। लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्। ते तुष्टास्तस्य तं दोषं शमयन्ति न संशयः। वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्। कृषीवलोऽन्नपानादि यानशय्यासनानि च। पण्येभ्यो विंशकं दत्त्वा पशुस्वर्णादिकं शतम्। वणिक् कुसीददोषः स्यात् ब्राह्मणानाञ्च पूजनात्। राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंशकम्” आ०त०। आर्षिकं कृषिशब्दे २२०५ पृ० दृश्यम्।

**बाणिनी** स्त्री वण—णिनि ङीप्। १विदग्धायां स्त्रियां २नर्त्तक्याम् ३मत्तस्त्रियाञ्च अजयपालः।

**बा(वा)दर** पु० ब(व)दर+स्वार्थेऽण्। १कार्पासवृक्षे, मेदि०। ब(व)दरस्येदं तस्य विकारो वा अण्। २कार्पाससूत्रे न०। ३तद्वस्त्रादौ त्रि० अमरः। ४कार्पासवृक्षे स्त्री अनन्तत्वेऽपि अजादेराकृतिगणत्वात् टाप् शब्दच०। [बा(वा)दरिरप्यत्र।

**बा(वा)दरायण** पु० ब(व)दर्य्यां भवः फक्। वेदव्यासे। इञि।